केशः। यथा। "मुक्तकेशाश्च चूलिनः।" इति लिङ्गपुराणम्॥

चूलकः, पुं, (चूल एव। चूल+स्वार्थे कन्।) केशः। यथा, मत्स्यसूक्ते ३८ पटले।
"गृहीतचूलको विप्रो म्लेच्छेन रजकादिना।
प्राजापत्यद्वयं कुर्य्यात् शूद्रः कुर्य्यात्तु भागतः॥
सशिखं निर्व्वपेत् केशं धृते चान्त्यावसायिना।
अन्त्यजैस्तु शिखावर्ज्जं शूद्रैरग्राङ्गुलिद्वयम्॥"

चूला, स्त्री, (चूड़ा+डस्य लत्वम्।) चन्द्रशाला। गृहोपरिगृहम्। इति शब्दरत्नावली॥ चूड़ा च॥

चूलिकं, क्ली, (चोलयति गोधूमचूर्णं पिष्टकाकारेण उन्नयति उत्पादयतीत्यर्थः। चुल+णिच्+ण्वुल्। पृषोदरात् दीर्घत्वे अत इत्वे च साधुः।) घृतभृष्टगोधूमचूर्णम्। इति शब्दचन्द्रिका॥ लूची इति भाषा॥

चूलिका, स्त्री, (चोलयति सन्निहितचर्म्ममांसराशिं उन्नयतीति। चुल+ण्वुल्+कापि अत इत्वञ्च। पृषोदरात् दीर्घत्वे साधुः।) हस्तिकर्णमूलम्। इत्यमरः।२।८।३८॥ नाटकाङ्गविशेषः। इति मेदिनी। के, ६०॥

चूष, पाने। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) दीर्घी चूषत्याम्रं लोकः। इति दुर्गादासः॥

चूषा, स्त्री, (चूष्यते पीयते पृष्ठमांसेनाद्दश्यतां नीयते इति। चूष+घञर्थे कः।) कक्ष्या। इत्यमरः।२।८।४२॥ काछदड़ी इति भाषा॥

चृत्, कि सन्दीपने। इति कविकल्पद्रुमः॥ (चुरां-पक्षे भ्वां-परं-सकं-सेट्।) कि, चर्त्तयति। इति दुर्गादासः॥

चृतृ, श हिंसे। ग्रन्थे। इति कविकल्पद्रुमः॥ (तुदां-परं-सकं-सेट्।) श, चृतति चर्त्तिता। ग्रन्थो ग्रन्थनम्। इति दुर्गादासः॥

चेटः, पुं, (चेटतीति। चिट् परप्रेषे+अच्।) दासः। इति हेमचन्द्रः॥ (यथा, कथासरित्सागरे। ६। १२७।
"एतत्तस्य सुखाकूला राजचेटस्य दुर्म्मनाः॥"
स तु शृङ्गारसहायः। यथा, साहित्यदर्पणे।३।४६।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्याः स्युः॥")

चेटकः, पुं, (चेटति दासत्वं करोतीति। चिट+ण्वुल्।) दासः। इत्यमरः। २। १०। १७॥ (यथा, कथासरित्सागरे। ६। १२४।
"आवाभ्यां राजहंसाख्य आहूतो राजचेटकः॥")
उपपतिनायकभेदः। तस्य लक्षणं सन्धानचतुरः। इति रसमञ्जरी॥

चेटिका, स्त्री, (चेटी+स्वार्थे कन् टापि अत इत्वं पूर्व्वह्रस्वः। यद्वा चिट् ण्वुल् टापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥ (यथा, कथासरित्सागरे। ४। ५१।
"अङ्गीकुर्व्वन् स तन्मूढश्चेटिकाभिः प्रवेशितः॥")

चेटी, स्त्री, (चेट+ङीप्।) दासी। इति हेमचन्द्रः॥ (यथा, रामायणे। २। ६१। ६४।
"प्रेष्याश्चेयश्च वध्वश्च वयस्याश्चापि सर्व्वशः॥")

चेड़ः, पुं, (चेटति परप्रेष्यत्वं करोतीति। चिट+अच्। टस्य ड़त्वञ्च।) दासः। इत्यमरटीकायां रमानाथः॥

चेड़कः, पुं, (चेटति इति। चिट+ण्वुल्। टस्य ड़त्वम्।) दासः। इत्यमरटीका॥

चेड़िका, स्त्री, (चेड़क+टाप्। कापि अत इत्वम्।) दासी। इति द्विरूपकोषः॥

चेड़ी, स्त्री, (चेड़+ङीप्।) दासी। इत्यमरटीका॥

चेत्, अ, (चित्+विच्।) यदि। इत्यमरः। ३। ४। १२॥ (यथा, पञ्चदश्याम्। ६। ४२।
"अन्यत्ववारकं सत्वमिति चेदन्यवारणम्।
कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत्॥"
पक्षान्तरम्। असन्देहेऽपि सन्देहवचनम्। यथा,
"सत्यञ्चेद्गुरुवाक्यमेव पितरो देवाश्च चेद्योगिनी
प्रीता चेत् परदेवता च यदि चेद्वेदाः प्रमाणं हि चेत्।
शाक्तीयं यदि दर्शनं भवति चेदाज्ञाप्य मोघास्मि चेत्
स्वातन्त्र्या अपि कौलिकाश्च यदि चेत् स्याच्चे जयः सर्व्वदा॥"
इति शब्दार्थचिन्तामणिधृतश्लोकः॥)

चेतः, [स्] क्ली, (चेतत्यनेन इति। चित्+करणेऽसुन्।) चित्तम्। इत्यमरः। १। ४। ३१॥ (यथा, पञ्चदश्याम्। १। ५४। [यत्।
"ताभ्यां निर्व्विचिकित्सेऽर्थे चेतसः स्थापितस्य
एकतानत्वमेतद्धि निदिध्यासनमुच्यते॥")

चेतकी, स्त्री, (चेतयते उन्मीलयति ज्ञानेन्द्रियबलादीनि। चित+ण्वुल्। गौरादित्वात् ङीष्।) हरीतकी। इत्यमरः।२।४।५६॥ हिमाचलभवा त्रिशिरा हरीतकी। सा च सर्व्वरोगनाशिनी गन्धयुक्तत्र्यकरणी प्रशस्ता। इति वैद्यकम्॥
("चेतकी द्विविधा प्रोक्ता आकाराद्वर्णतस्तथा।
षड़ङ्गुला हिता प्रोक्ता शुक्ला चैकाङ्गुला स्मृता॥
श्रेष्ठा कृष्णा समाख्याता रेचनार्थे जिगीषुणा।
चेतकी वृक्षशाखायां यावत्तिष्ठति तां पुनः॥
भिन्दन्ति पशुपक्ष्याद्या नराणां कोऽत्र विस्मयः।
चेतकीं यावद्विधृत्य हस्ते तिष्ठति मानवः॥
तावद्भिनत्ति रोगांस्तु प्रभावान्नात्र संशयः॥"
इति कल्पस्थाने प्रथमेऽध्याये हारीतेनोक्तम्॥
एतस्या उत्पत्तिगुणजात्यादिकं यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"पपात बिन्दुर्मेदिन्यां शक्रस्य पिबतोऽमृतम्।
ततो दिव्या समुत्पन्ना सप्तजातिर्हरीतकी॥
हरीतक्यभया पथ्या कायस्था पूतनाऽमृता।
हैमवत्यथ्यथा चापि चेतकी श्रेयसी शिवा॥
वयस्था विजया चापि जीवन्ती रोहिणीति च।
विजया रोहिणी चैव पूतना चामृताऽभया॥
जीवन्ती चेतकी चेति पथ्यायाः सप्तजातयः।
अलाबुवृत्ता विजया वृत्ता सा रोहिणी स्मृता॥
पूतनास्थिमती सूक्ष्मा कथिता मांसलामृता।
पञ्चरेखाऽभया प्रोक्ता जीवन्ती स्वर्णवर्णिनी॥
त्रिरेखा चेतकी ज्ञेया सप्तानामियमाकृतिः।
विजया सर्व्वरोगेषु रोहिणी व्रणरोहिणी॥
प्रलेपे पूतना योज्या शोधनार्थेऽमृता हिता।
अक्षिरोगेऽभया शस्ता जीवन्ती सर्व्वरोगहृत्॥
चूर्णार्थे चेतकी शस्ता यथायोगं प्रयोजयेत्।
चेतकी द्विविधा प्रोक्ता श्वेता कृष्णा च वर्णतः॥
षड़ङ्गुलायता शुक्ला कृष्णात्वेकाङ्गुला स्मृता।
काचिदास्वादमात्रेण काचिद्गन्धेन भेदयेत्॥
काचित् स्पर्शेन दृष्ट्यान्या चतुर्द्धा भेदयेच्छिवा।
चेतकी पादपच्छायामुपसर्पन्ति ये नराः॥
भिद्यन्ते तत्क्षणादेव पशुपक्षिमृगादयः।
चेतकी तु धृता हस्ते यावत्तिष्ठति देहिनः॥
तावद्भिद्येत रोगैस्तु प्रभावान्नात्र संशयः।
न धार्य्यं सुकुमाराणां कृशानां भेषजद्विषाम्॥
चेतकी परमा शस्ता हिता सुखविरेचनी॥")
जातीपुष्पम्। इति राजनिर्घण्टः॥

चेतनः, पुं, (चेतति जानाति सर्व्वं इति। चित्+कर्त्तरि ल्युः।) आत्मा। इति हेमचन्द्रः॥ (यथा, पञ्चदश्याम्। ६। ४५।
"चेतना चेतनभिदा कूटस्थात्मकृता न हि।
किन्तु बुद्धिकृताभासकृतैवेत्यवगम्यताम्॥")
मनुष्यः। इति राजनिर्घण्टः॥ प्राणी। इत्यमरः। १। ४। ३०॥
("रथादौ नियता चेष्टा चेतनेनाधितिष्ठिते।
न दृष्टा चेतनस्तेन प्राणादीनां प्रवर्त्तकः॥"
इति शब्दार्थचिन्तामणिधृतवचनम्॥)
चेतनं चैतन्यं विद्यतेऽस्य इति। "अर्श आदिभ्योऽच्।"५।२।१२७। इत्यच्।) प्राणयुक्ते त्रि। इति मेदिनी। ने, ६४॥ (यथा, मेघदूते। ५।
कामार्त्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु॥")

चेतनकी, स्त्री, (चेतनं करोति बुद्धीन्द्रियादिस्फुरणं वर्द्धयतीत्यर्थः। कृ+डः। ततो ङीष्।) हरीतकी। इति राजनिर्घण्टः॥

चेतना, स्त्री, (चेतयतेऽनया इति। चित् संज्ञाने "ण्यासश्रन्थेति।" युच् टाप् च।) बुद्धिः। इत्यमरः।१।५।१॥ (यथा, भागवते। ४। २१। ३४।
"प्रधानकालाशयधर्म्मसंग्रहे
शरीर एष प्रतिपद्य चेतनाम्॥"
"एष विभुः परमात्माऽपि शरीरे विषयकारां बुद्धिं प्राप्य क्रियाफलत्वेन प्रतीयते।" इति टीकाकृत्स्वामिः॥) सा गर्भस्थबालकस्य सप्तमिमासैर्भवति। इति सुखबोधः॥ (ज्ञानात्मिका मनोवृत्तिः। यथा, भगवद्गीतायाम्। १३। ६।
"इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः॥"
तस्यामभिव्यक्तेन्द्रियवृत्तिः तप्त इव लौहपिण्डेऽग्निरात्मचैतन्याभासरसविद्धा चेतना इति शाङ्करभाष्यम्। ज्ञानात्मिका मनोवृत्तिरिति श्रीधरस्वामी॥ स्वरूपज्ञानव्यञ्जिकायां प्रमाणासाधारणकारणिकायां चित्तवृत्तौ ज्ञानाख्यायां भगवतो विभूताविति शब्दार्थचिन्तामणिः॥)